# Venkateshanidhyanam

# શ્રીવેઙ્કટેશનિધ્યાનમ્

## Document Information

Text title : veNkaTeshanidhyAnam

File name : venkaTeshanidhyAnam.itx

Category : vishhnu, venkateshwara, stotra, vishnu, dhyAnam

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : April 4, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશનિધ્યાનમ્

ઈશાનાં જગતોઽસ્ય વેઙ્કટપતેર્વિષ્ણોઃ પરાં પ્રેયસીં
તદ્વક્ષસ્સ્થલનિત્યવાસરસિકાં તત્ક્ષાન્તિસંવર્ધિનીમ્ ।
પદ્માલઙ્કૃતપાણિપલ્લવયુગાં પદ્માસનસ્થાં શ્રિયં
વાત્સલ્યાદિગુણોજ્જ્વલાં ભગવતીં વન્દે જગન્માતરમ્ ॥ ૧॥

શ્રીવેઙ્કટેશદયિતાં શ્રિયં ઘટકભાવતઃ ।
સમાશ્રિત્ય વૃષાદ્રીશચરણૌ શરણં શ્રયે ॥ ૨॥

શ્રીમન્ શેષગિરીશ તે પદયુગે મઞ્જીરસંરાજિતે
સક્તં માનસમસ્તુ મે તવ શુભે જઙ્ઘે સુજાન્વઞ્ચિતે ।
રમ્ભાકાન્તિહરોરુકાણ્ડયુગલીં પ્રાપ્તં કટીં સેવતે
કાઞ્ચીનૂપુરકિઙ્કિણીપરિચિતાં પીતામ્બરાલઙ્કૃતામ્ ॥ ૩॥

નાભીપઙ્કજતુન્દબન્ધનલસદ્દિવ્યોદરાપાશ્રયં
પદ્માકૌસ્તુભહારમાલ્યસુભગાં વક્ષસ્સ્થલીં ગાહતે ।
સર્વાભીષ્ટવરપ્રદાનકટિબન્ધાબ્જાગ્ર્યચક્રોજ્જ્વલૈઃ
હસ્તૈઃ શ્લિષ્ટમનલ્પભૂષણયુતૈઃ કણ્ઠં સમાલમ્બતે ॥ ૪॥

મુક્તારત્નવિરાજિકુણ્ડલલસદ્ગણ્ડં સુબિમ્બાધરં
નાસાશોભિ દયાર્દ્રલોચનયુગં સુભ્રૂર્ધ્વપુણ્ડ્રોજ્જ્વલમ્ ।
વક્ત્રં રત્નલલાટિકાપરિલસત્ભાલં સતૃષ્ણં પિબત્
મૌલૌ રજ્જતિ માલ્યશોભિનિ મહારત્નાભિષેકોજ્જ્વલે ॥ ૫॥

ભૂયો વક્ત્રમનુપ્રસર્પતિ તતઃ કણ્ઠાવસક્તં ભુજૈઃ
શ્લિષ્ટં વક્ષસિ પદ્મયા પરિચિતે લગ્નં પુનર્મધ્યમમ્ ।
કટ્યૂરુદ્વયજાનુષુ પ્રવિતતં જઙ્ઘાવસક્તં પદોઃ ।
પ્રાપ્તં તિષ્ઠતિ તત્ર ગાત્રસુષમાસક્તં વૃષાદ્રીશ તે ॥ ૬॥

॥ ઇતિ શ્રીવેઙ્કટેશનિધ્યાનમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com
From a telugu book veNkaTeshakAvyakalApa

*Venkateshanidhyanam*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*